व्याकरणादिलक्षणम्

१. व्याकरण लक्षणम्

शब्दज्ञानजनकं व्याकरणम्।

२. सूत्र लक्षणम्

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतो मुखम्।
अस्तोभमनदद्यं च सूत्रं सूत्रविदो विद्दः।।

३. सूत्र-भेदाः

संज्ञा च परिभाषा च विधिर्नियम एव च ।
अतिदेशोऽधिकारश्च षड्विधं सूत्र लक्षणम्।।

४. वार्तिक-लक्षणम्

उत्त्काऽनुत्त्कदुरुक्तानां चिन्ता यत्र प्रवर्तते।
तं ग्रन्थं वार्तिकं प्रहुवार्तिकज्ञा मनीषिण।।

५. भाष्य-लक्षणम्

सत्रार्थो वर्ण्यते तत्र पदैः सूत्रानुसारिभिः।
स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः।।

६. व्याख्यान-लक्षणम्

पढच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ।
आश्रेपश्च समाधानं व्याख्यानं षड्विधं मतम्।।

७. आचार्य-लक्षणम्

आचिनोति च रास्रार्थमाचारे स्थापयत्यपि।
स्दयं चाचरते यस्मात् तस्मादाचार्य उच्यते।।

८. उपाध्याय-लक्षणम्

एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः।
अध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते।।

९. शिष्य-लक्षणम्

य आचार्यपराधीनस्तद्वाक्यं पालयत्यपि।
शासने स्थिरवृत्तिश्च शिष्यः सद्थिरुढाहृतः।।

१०. मातृवत् परदार्षु परद्रव्येषु लोष्ठवत्
आत्मदत् सर्वभूतेषु यःपरयति स पण्डितः।

११. आचार्यःत्रिविधः

चोदको दर्शयेन्मार्गं बोधकः स्थानमाचरेत्।
मोक्षदस्तु परं तत्त्वं यज्ज्ञात्वा परमश्नुते।।

१२. आयुर्देदः

आयुर्वेदः

आयुर्हिताहितं व्याधेर्निदानं शमनं तथा।
विद्यते यत्र विद्वद्भिः स आयुर्वेद उच्यते।।

१३. उपोद्धातः

स्थानं निमित्तं वक्ता च श्रोता श्रोतृप्रयोजनम्।
संबन्धाद्यभिधानञ्च उपोद्धातःस उच्यते।।

१४. कन्था

त्यक्तं वस्त्रं गृहस्थेन बहिःप्रक्षाल्य यत्नतः।
सहस्त्रं डोरिकां दद्यात् कन्था सेत्यथिधीयते।।

१५. कलियुगम्

निर्बीजा पृथिवी निरोषधिर्सा नीचा महत्त्वं गताः।
थूपाला निजधर्म-कर्मरहिताःविप्रा कुमार्गे गताः।।

भार्या-भर्तृविरोधिनी पररता पुत्राःपितुर्दूषकाः।
हा कष्टं खलुवर्तते कलियुगे धन्या मृता ये नराः।।
१६. कौपीनम्
एकहस्तप्रविस्तारं करद्वन्द्वसमायतम्।
विलम्बिततृतीयांशं गुह्याच्छादनमीरितम्।।
१७. आक्रुष्टोऽभिहतो यस्तु नाक्रोशेन्न हनेदपि ।
अदुष्टैर्वाङ्‌यनः कायैस्तितिक्षुश्च क्षमास्मृता।।
१८. गीतं
स्वरतालग्रामभेदरागरागाङ्गभूषितम्।
संस्कृतं वा प्राकृतं वा गीतं कीतविदो विदुः।।
१९. जितेन्द्रियः
श्रुत्वा स्पृष्ट्वाथ दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः।
न हृष्यति ग्लायति वा स विज्ञेयो जितेन्द्रियः।।
२०. अन्तर्मुखानि यदि खानि तपस्ततः किम्।
नान्तर्मुखानि यदि खानि तपस्ततःकिम्।
अन्तर्बहिर्यदि हरिश्च तपस्ततःकिम्।
नान्तर्बहिर्यदि हरिश्च तपस्ततःकिम्।।
२१. देशान्तरं
महानद्यन्तरं यत्र गिरिर्वा व्यदधाय...
२२. परार्द्धम्
स्थानात्स्थानं दशगुणमेकैकं गुण्यते द्विजाः।
ततो ह्यष्टादशे भागे परार्द्धमथिधीयते।।
२३. पुस्तकत्वं
तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबन्धनात्।
मूर्खहस्ते न दातव्यं वदेदेवञ्च पुस्तकम्।।
२४. प्रायो नाम तपःप्रोक्तं चित्तं निश्चय उच्यते।
तपो निश्चयसंयुक्तं प्रायश्चित्तं तदुच्यते।।
२५. ब्रह्मचर्यम्
कायेन मनशा वाचा सर्वावस्थासु सर्वदा।
सर्वत्र मैथुन्तयागो ब्रह्मचर्यं प्रचक्षते।।
२६. तपःश्रुतञ्च योनिश्च ह्येतद्ब्राह्मणकारणम्।
तपःश्रुताभ्यां यो हीनो जातिब्रह्मण एव सः। -पतञ्जलि
२७. भिक्षा
ग्रास्मात्रं भवेद्भिक्षा पुष्कलन्तु चतुर्गुणम्।
पुष्कलानि च चत्दारि हन्तकारो विधीयते।।
अष्टौ ग्रसा मुनेर्थक्ष्याःषोडशारण्यदासिनाम्।
द्वात्रिंशत्तु गृहस्थस्य यथेष्टं ब्रह्मचारिणाम्।।
यतिश्च ब्रह्मचारी च विद्यार्थी गुरुपोषकः।
अध्वगःक्षीणवृत्तिश्च षडेते थिक्षवःस्मृताः।।
२८. भेदभावः
मानाभावादयुक्तेश्च न थिदेश्वरजीवयोः ।
जीवानामचितां चैव नात्मतो न परस्परमिति भेदधिक्कारे।।
२९. मनोहरः
यस्मिन्सक्तं मनःपुंसां नान्येन ह्रियते मनः।
अन्येभ्यो यच्च हरति तन्मनोहरमुच्यते।।

३०. म्लेच्छः
गोमांसखाढको यस्तु विरुधद्धं बहु भाषते।
सर्वाचारविहीनश्च म्लेच्छ इत्याथिधीयत्।।
३१. मौनं
वाचौ यस्मान्निवर्तन्ते तद्वक्तं केन शक्यते।
प्रपञ्चो यदि वक्तव्यः सोपि शब्दविवर्जितः।
इति वा तद्भवेन्मौनं सर्वं सहजसंज्ञितम्।
गिरां मौनं तु बावानामयुक्तं ब्रह्मवादिनाम्।।
३२. लेखकः
शीर्षोपेतान्सुसंपूर्णन्समश्रेणिगतान्समान्।
अक्षरान्विलिखेद्यस्तु स लेखक इति स्मृतिः।।
३३. लोभः
परवित्तादिकं दृष्ट्वा नेतुं यो हृदि जायते।
अभिलाषो द्विजश्रेष्ठ स लोबःपरिकीर्तितः।।
३४. विषथतवं
विशब्दश्च विशेषार्थःसिनोतिर्बन्धनार्थकः।
विशेषेण सिनोतीति विषथोऽर्थनियामकः।।
३५. व्यवहारः
विनानार्थेऽव सन्देहे हरणं हार उच्यते।
नानासन्देहहरणाद्यवहार इति स्मृतः।।
३६. शौचं
अहं ममेति विण्मूत्रलेपगन्धादिमोचनम्।
सुद्धशौचमिति प्रोक्तं मृज्जलाश्यां तु लौकिकम्।।
३७. श्री
देवं गुरुं गुस्स्थानं क्षेत्रं क्षेत्राधिदेवताम्।
स्द्धिं सिद्धाधिकाराँश्च श्री चूर्दं समुदीरयेत्।।
३८. सन्न्यासः
कर्मत्यागान्न संन्यासो न प्रैषोच्चारणेन तु।
सन्धौ जीवात्मनोरैक्यं संन्यासःपरिकीर्तितः।।
३९. साधुत्वम्
निर्वैरःसदयःशान्तो दम्भाहङ्काखर्जितः।
निरपेक्षो मुनिर्वीतरागःसाधुरिहोच्यते।।
४०. सिद्धये सर्वभूतादि विश्वाधिष्ठानमद्वयम्।
यस्मिन्सिद्धिङ्गताःसिद्धास्तत्सिद्धासन्मुच्यते।।
४१. पद्मिनी चित्रिणी चैव शङ्खिनी हस्तिनीतथा।
शशो मृगो वृषोअश्द स्त्रीपुंसोर्जातिलक्षणम्।।
कोधर्मःकिं यथरत्षां का प्रतिष्ठा च किं
बुद्धिविद्याज्ञानञ्च परस्त्रीषु च यन्मन्ः
४२. दर्शने स्पर्शने वापि श्रवणे भाषणेऽपि वा।
यत्र द्रवत्यन्तरङ्ग स स्नेह इति कथ्यते।।
४३. स्मरणाद्वै निमित्तानां धर्माधर्मनिरुपणात्।
तिमिरोत्पाटनाद्देविस्मृतिरित्यथिधीयते।।
४४. आसिन्धुसिन्धुपर्थन्ता यस्य भारतभूमिका।
पितृभूःपुण्यभूश्चैव स वै हिन्दुरिति स्मृतः।।

४५.नमस्कारस्तथाशीश्च सिद्धान्तोक्तिःपराक्रमः।
विभूतिःप्रार्थना चेति षड्विधं स्तोत्रलक्षणम्।।
४६. अज्ञातकुलगोत्रो वा मध्याह्नादिस्मागतः।
अन्नाद्यर्थी मानवो यः सोऽतिथिःपरिकीतितिः।।
४७. अनात्मा
अप्राप्तःप्रापयते योऽयमत्यनतं त्यज्यतेऽथवा
जानीयात्तमनात्मानं बुद्ध्यामानं वपुरादिकम्।।
४८. अनाहतं
राब्दो ब्रह्ममयःशब्दोऽनाहनो यत्र दृश्यते।
अनाहताख्यं तत्पदमे मुनिथि परिकीर्तितम्।।
४९. अनुक्तसिद्धिः
प्रस्तोदेनैव शेषोऽर्थःकृत्सनो यत्र प्रतीयते।
वचनेन विनाऽनुक्तसिद्धिः सा परिकीर्तिता।।
५०. अनुनयः-(विनयः)
उभयोःप्रीतिजननो विरुद्धाभिनिवेशिनोः।
अर्थप्रसाधकश्चैव विज्ञेयोऽनुनयो बुधैः।।
५१. अन्त्यजः
रजकश्चर्मकारश्च नटो वरुड एव च।
कैवर्तभेदभिल्लाश्च सप्तैते ह्यन्तयजाःस्मृताः।।
५२. अन्धः
श्रुतिस्मृती च विप्राणां चक्षुषी देवनिर्मिते।
काणस्तत्रैकया हीनो द्वाभ्यामन्धः प्रकीर्तितः।।
५३. अन्धभिक्षः
तिष्ठतो व्रजतो वापि यस्य चक्षुर्न दूरगम्।
चतुर्युगां भुवं मुक्त्वा परिव्राट् सोऽन्ध उच्यते।।
५४. अभिप्रायः
अभूतपूर्वो यो ह्यर्थःसादृशयात्परिकल्पितः।
लोकस्य हृदयग्राही सोऽभिप्राय इति स्मृतः।।
५५. अवधूतः
केशपाशतरङ्गाणां व्रजं येन विकुण्ठितम्।
सर्वावस्थाविनिर्मुकतःसोऽवधूतोऽभिधीयते।।
५६. अशस्त्रवधः
अज्ञाभङ्गो नरेन्द्राणां विप्राणां मानखण्डनम्।
प्रथक्शाय्था च नरीणामरास्त्रदध उच्यते।।
५७. आक्षिप्तिका
चञ्चत्पुटादितालेन मार्गत्रयविभूषिता।
आक्षिप्तिका सारपदग्रथिताकथिता बुधैः।।
५८. आचार्यः
नानाविधानि कार्याणि कर्ता कारयिता च यः।
सर्वधर्मविधिज्ञश्च स आचार्य इत्युच्यते।।
५९. आसनम्
सुखेनैव भदेद्यस्मिन्नजस्त्रं ब्रह्मचिन्तनम्।
आसनं तद्विजानीयादन्यत्सुखविनाशनम्।।
६०. उत्तरं
पक्षस्य व्यापकं सारमसंदिऽधमनाकुलम्।

अव्याख्यागम्यमित्येतदुत्तरं तद्विदो विदुः।।
६१. उपविष्टः
परिसंगृह्य शास्त्रार्थं यद्वाकयमभिधीयते।
विद्वन्मनोहरं स्वन्तमुपद्रिष्टं तदुच्यते।।
६२. उपवासः
उपावृत्तस्य पापेभ्यो यस्तु वासोगुणैःसह।
उपवासःस विज्ञेयः सर्वभोगविवर्जितः।।
उपसमीपे यो वासो जीवात्मपरमात्मनोः।
उपवासः स विज्ञेयो नतु कायस्य शोषणम्।।
६३. यद्गतागतविश्रान्तिवैचित्र्येण विवर्तनम्।
तारकायाः कलाविज्ञास्तं कटाक्षं प्रचक्षते।।
६४. कटिसूत्रं
कार्पाससूत्रसंभतं त्रिगुणं त्रिगुणीकृतम्।
तत्पुनस्त्रिगुणं चेति सप्तविंशतिसूत्रकम्।
प्रदक्षिणक्रमेणेति कटिसूत्रमुदाहृतम्।।
६५. कढर्यः
आत्मानं धर्मकृत्यं च प्रत्रढारांश्च पीडयेत्।
लोभाद्यः पितशै भ्रातृन्स कदर्थ इति स्मृतः।।
६६. करमाला
आरभ्यानामिकामध्यं दक्षिणावर्तयोगतः।
तर्जनीमूलपर्यन्तं करमाला प्तकीर्तिता।।
६७. कर्तव्यमेव कर्तव्यं प्राणैःकण्ठगदेरपि।
अकर्तव्यं न कर्तव्यं प्राणैःकण्ठगतैरपि।।
६८. कामः
स्त्रीषु जोतो मनुष्याणां स्त्रीणाञ्च पुरुषेषु वा।
परस्परस्कृतःस्नेहः काम इत्यभिधीयते।। (क्रयलेख्यम्-१२४)
६९. अश्ववाहनतत्त्वज्ञः संग्रामं न परित्यजेत्।
आरम्भनिरतःसूरो ब्रह्मणःक्षत्रिय उच्यते।।
७०. क्षमा
आक्रुष्टोऽभिहतो यस्तु नाक्रोशेन्न हनेदपि।
अदुष्टैवङ्मनः कायैस्तितिक्षुश्च क्षमा स्मृता।।
७१. गण्डः-कपोलः
अन्यदन्यच्च वदतो द्वयोर्वाक्यसमागमेः।
जायतेऽनिष्टमिष्टं वा स गण्ड इति कीर्तितः।।
७२. गर्भः
उद्भेदस्तस्य बीजस्य प्राप्तिरप्राप्तिरेव च।
पुनश्चान्वेषणं यत्र स गर्भ इति संस्मृतः।।
७३. गर्वः
ऐश्वर्थरूपतारुण्यकुलविद्याबलैरपि।
इष्टलाभादिनान्येषामवज्ञा गर्व ईरितः।।
७४. गर्हणम
यत्र सङ्किर्तयेद्दोषं गुणञ्च विनिपातयेत्।
भर्त्सनाद्बहुशो ज्ञेयंगर्हणं नाम सूरिभिः।।
७५. गुरुः

संस्कृतैःप्राकृतैश्चैव गद्यपद्याक्षरैस्तथा।
देशभाषादिभिःशिष्यं बोधयेत्स गुरुःस्मृतः।।

७६. चाण्डालब्रह्मणः
देलद्रव्यगुरुद्रव्यपरदाररतःसद्दा।
निष्ठुरःसर्वभूतानां विप्रश्चण्डाल उच्यते।।

७७. चान्द्रायणं
एकेकं वर्द्धयेत्पिण्डं शुक्ले कृष्णे च ह्रासयेत्।
इन्दुक्षये न भुञ्जीत एष चान्द्रायणो विधिः।।

७८. जीवः
आत्मनःप्रतिबिम्बश्च देही जीवः स एव च।
प्राणदेहिदिभूद्देहि स जीवः परिकीर्तितः।।

७९. तच्चिन्तनं तत्कथनमनयोन्यं तत्प्रबोधन्।
एकदेक परत्वञ्च ज्ञानाश्यासं विदुर्बुधाः।।

८०. यत्किञ्चिद्वस्तु संप्राप्य स्वलपं वायदि वा बहु।
या तुष्टिर्जायते चित्ते तृष्णाक्षयं प्रचक्षते।।

८१. तेजः
अधिक्षेपापमानादेःप्रय्क्तस्य परेण यत्।
प्राणात्ययेऽण्यसहनं तत्तेजःसमुदाहृतम्।।

८२. दण्डः
अङ्गुष्ठमात्रं स्थौल्येन बाहुमात्रःप्रमाणतः।
सार्द्रष्च सपलाशश्च दण्ड इत्यभिधीयते।।

८३. दया
परेवा बन्धुवर्गे वा मित्रे द्वेष्टरि वा सदा।
आत्मवद्वर्तिण्यं हि दयैषा परिकीर्तिता।।

८४. दिष्टं
चथादेशं यथाकलं यथारूपं च वण्येन।
प्रत्यक्षं च परोक्षं च तद्दिष्टमिति कीर्तितम्।।

८५. दीक्षा
दीयते ज्ञानसद्भावः श्रीयते पशुबन्धना।
दानक्षपण संयुक्ता दुक्षा (दीक्षा) तेनेह कीर्तिता।।

८६. दृष्टिः
चलस्य चेतसो या स्यादुदासीनेषु वस्तुषु।
आवरणीया वृत्तिःसादृष्टि शब्देन कथ्यते।।

८७. देवब्राह्मणः
भिक्षाशी ज्ञाननिरतः संतुष्टश्च जितेन्द्रियः।
वेदशास्त्रार्थतत्त्वज्ञो देवो विप्रःप्रकीर्तितः।।

८८. देवयानमार्गः
नागवीथ्युत्तरेयश्च सप्तर्षिभ्यश्च दक्षिणम्।
अत्तरसवितुःपन्था देवयानस्तु स स्मृतः।।

८९. देशपरिच्छेदः
महानद्यनतरं यत्र गिरिर्वा व्यवधायकः।
वाचो यत्र विभिद्यन्ते तत् उच्यते।।

९०. द्वैतवादः

प्रयोजनान्यनेकानि सा मालेत्यभिधीयते।।
११९. मित्रं
संपत्काले च मित्राणिसन्ति कोटिसहस्रशः।
आपत्कालेतु यन्मित्र तन्मित्रं परिकीर्तितम्।।
१२०. मुग्धः
सान्निध्ये विषयाणाञ्च समर्थोऽविकलेन्द्रियः।
सुप्तवद्वर्तते नित्यं भिक्षुर्मुग्धःस उच्यते।।
१२१ म्लेच्छब्राह्मणः
वापीकूपतडागानामारामसुकदेरमनाम्।
विच्छेदने निरातङ्कः स विप्रो मलेच्छ उच्यते।।
१२२. रामः
राशब्दो विश्वदचनो मश्चापीश्वरवरवाचकः।
विश्वानामीश्वरो यो हि तेन रामःप्रकीर्तितः।।
१२३. वनमाला
आपादलम्बिनी माला सर्वर्तुकुसुमोज्ज्वला।
मध्ये स्थूलकदम्बठया वनमालेति कीर्तिता।।
तुलसीकुन्दमन्दारपारिजातसरोरुहेः।
पञ्चभिःपुष्पैरेतैः वनमाला प्रकीर्तिता।।
१२४. वाक्पारुष्यं
दशजातिकुलादीनामाक्रोरान्यङ्गसंयुतम्।
यद्वचःप्रतिकूलार्थं तदुच्यते।।
१२५. वाधिकजपः
यदुच्चनीचोच्चरिःशब्दैःस्पष्टपदाक्षरैः।
मन्त्रमुच्चारयोद्वाचा वाचिकोऽयं जपःस्मृतः।।
१२६. वाच्यलिङ्गः
वाच्यमित्युच्यते मेद्यं तल्लिङ्गभजने तु यः।
विशेषणत्वमापन्नो वाच्यलिङ्गःस उच्यते।।
१२७. वानप्रस्थः
गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः।
अपत्यस्यैव चापत्यं तदारण्यंसमाश्रयेत्।।
१२८. वानप्रस्थब्राह्मणः
अकृष्टफलमूलाशी वनवासरतः सदा।
कुरुतेऽहरहः श्रात्यं मुनिर्दिप्रः स उच्यते।।
१२९. वामा
या पुनः पूज्यमाना तु देवादीनां तु पूर्वतः।
यज्ञभागंस्वयं धत्ते सा वामा तु प्रकीर्तिता।।
१३० विचारः
युक्तिवाक्यैरनेकैश्च अप्रत्यक्षार्थसाधनः।
अनेकोपायसंयुक्तो विचार इति कीर्तितः।।
१३१. विमर्शः
गर्भनिर्मिन्नबीजार्थो विलोमनकृतोपि वा।
तस्य वाश्लेषसंयुक्तः स विमर्श इति स्मृतः।।
१३२. विशेषणं

सिद्धान्बहून्प्रधानार्थानुकत्वायत्र प्रयुज्यते।
विशेषयुक्तं वचनं ज्ञेयं तद्धिविशेषणम्।।
१३३. वृथालापः
आध्यात्मिकीं कथां मुक्त्वा भिक्षायाच्आसुरस्तुतिं।
अनुग्रहं पथिप्रश्नं वृथाजल्पोन्य उच्यते।।
१३४. वेदः
विदिताखिलशास्त्रार्थसर्वधर्मनिरूपणात्।
दर्शनानां प्रमाणत्वादेद इत्यभिधीयते।।
१३५. दैद्यः
आयुर्वेदकृताभ्यासःसर्वेषां प्रियदर्शनः।
आर्यशीलगुणोपेत एषवैद्योऽभिधीयते।।
१३६. वैश्यब्राह्मणः
लोककर्मसुनिरतःपशूनां परिपालकः।
वाणिज्यकृषिकर्ता च स विप्रो वैश्य उच्यते।।
१३७.राठः
प्रियंव्यक्तिपरोथऽन्यत्र विप्रियं कुरुते भृथम्।
व्यक्तापराधचेष्टश्च शठोऽयं कथितो बुधैः।।
१३८. शान्तिः
यत्किञ्चिद्वस्तु संप्राप्थ स्वल्पं वा यदिवा बहु।
यातुष्टिर्जायते चित्ते स शान्तिर्गद्यते बुधैः।।
१३९. शाम्भवी दीक्षा
गुरोरालोकमात्रेण भाषणात्स्पर्शनादपि।
सद्यःसंजयते ज्ञानं सादीक्षा शाम्भवी मताः।।
१४०. शास्त्रीयः
अशास्त्रीयत्वान्मुखतःशास्त्रापेतमिदं विदुः।
शास्त्रतिर्णयगम्यत्वाच्छास्त्रीयथिधीयते।।
१४१. शूद्रब्राह्मणः
लाक्षादितैलनीलीनां कौसुंभदधिसपिषाम्।
दुग्धतक्रविक्रयी च स बिप्रःशूद्र उच्यते।।
१४२. शौचं
अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिन्दिदैः।
स्वधर्मे च व्यवस्थानं शौचमित्यभिधीयते।।
अहं ममेति विण्मूत्रलेपगन्धादिमोचनम्।
शुद्धशौचमिति प्रोक्तं मृज्जलाभ्यां तु लौकिकम्।।
१४३. श्रुतिः
श्रुतिस्मृतिदिरोधे तु स्मृतेस्त्यागो विधीयते।
तथैव लौकिकं वाक्यं स्मृतिबाधे परित्यजेत्।।
१४४. षण्डः
सद्यो जातां यथा नारीं तथा षोडशवर्षिकीम्।
शतवर्षां च यो द्दष्ट्वा निर्विकारःस षण्डकः।।
१४५.सत्यं
असत्यमपि वक्तव्यं गोब्राह्मणहिताय च
सत्यादपि हि तत्सत्यं न सत्यं सत्यमुच्यते।।

१४६. सन्यासः
देहन्यासो हि संन्यासो नैव काषायवाससा।
नाहं देहोऽहमात्मेति निश्चयो त्यासलक्षणं।।
१४७. सप्तर्षिः
कश्यपोऽत्रिर्वसिष्ठश्च विश्वामित्रोऽथ गौतमः।
जमदग्निर्भरद्वाज इति सप्तर्षयःस्मृताः।।
१४८. स्वरज्ञानपरो नित्यं स्वरवादी कवीश्वरः।
संसारसागरे पारे सोऽभिधानःसरस्वतीं।।
१४९. जातो लक्षबलिर्यत्र होमो वा कोटिसङ्ख्यकः।
महाविद्याजपाःकोट्यःसिद्धपीठःप्रकीर्तितः।।
१५०. सिद्धान्ताचारः
आत्मानं देवतां मत्वा यजेन्नेवञ्च मानसैः।
सदा सुद्धःसदा सान्तःसिद्धान्ताचार उच्यते।।
१५१. सिद्धिः
बहूनां तु प्रधानानां नाम यत्रानुवर्ण्यते।
अभिप्रेतार्थसिद्धार्थं सा सिद्धिरिति गीयते
१५२. सुंदरं
अङ्गप्रत्यङ्गकानां यः सन्निवेशो यथोचितम्।
सुश्लिष्टःसन्धिबन्धः स्यात् तत् सुन्दरमुदाहृतम्।।
१५३. सेनापतिः
समस्तनीतिशास्त्रज्ञः वाहने पूनिश्रमः।
यौर्यवीर्यगुणोपेतः सेनाध्यक्षो विधीयते।।
१५४. स्तेयं
प्रत्यक्षं वा परोक्षं वा रात्रौ वा यदि वा दिदा।
यत्परद्वयहरणं स्तेयं तत्परिकीर्तितम्।।
१५५. स्त्रीदोषः
अनृतं साहमं माया भूर्खत्बमतिलोभता।
अशौचं निर्दयत्वं च स्त्रीणां दोषाःस्वभावजाः।।
१५६. स्वरः
श्रुत्यनन्तरभावीयः शब्दोऽनुरणनात्मकः।
रक्तो रंजयति श्रोतृचित्तं स स्वर उच्यते।।
१५७. स्वस्तिकं
ऊरुजङ्घान्तरापादौ यादाग्रे जानुमध्यमे।
योगिनो यद्वस्थानं स्वस्तिकं तद्विदुर्बुधाः।।
१५८. मन्त्रः
मकारं मननं चैव त्रकारं त्राणमुच्यते।
मननत्राणमित्याहुः मन्द्रमित्यभिधीयते।।
१५९. जपः
जकारो जन्मविच्छेदः पकारो पापनाशनः।
जर्मकर्महरो यस्मात्तस्मात् जप इत्युच्यते।।
१६०. मन्त्रः
मोचयन्ति च संसाराद्योजयन्ति परे शिवे।

मननत्राणधर्मित्वात्तेन मन्त्रा इति स्मृताः।।
१६१. आयुर्वेदः
हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्।
मार्न ध तच्च यत्रोक्तमयुर्वेदः स उच्यते।।
१६२. नकुलं कुलमित्याहुःआचारःकुलमुच्यते।
आचार रहितो राजन् नेह नामुत्र विन्दति।।
-भविष्योत्तर पुराणम्
१६३. सर्वाणि हृदयस्थानि मङ्गलानि शुभानि च।
ईप्सितानि ददातीति तेन सा सर्वमङ्गला।।
१६४. शोभनानि च श्रेष्ठानि या देवी ददते हरे।
भक्तानां आर्तिहरणी तेनेयं सर्वमङ्गला।। -दैवीपुराणम्
१६४. धर्मः
धर्मेति घारणे धातुर्महत्वे वै प्रपद्यते।
धारणेन महत्वेन धर्म एव निस्चयते।।
तेनेष्टप्रापको धर्मःआचार्यैरुपदिश्यते।
इतरोऽनिष्टफलदस्त्वाचार्यैरुपदियते।।
१६५.रुद्रः
रुग् दुःख दुःखहेतुर्वा तद्रावयति यःप्रभुः।
रुद्र इत्युच्यते तस्मात् शिवःपरमकारणम्।। -सम्हिता
१६६. वर्तमानान्यतीतानि तथैवानागतान्यपि।
स्मरते सर्वकार्याणि तेनासौ स्मृतिरुच्यते।। -वायुपुराणम्
१६७. धर्मः
१. प्रभवार्थाय भूतानां धर्मप्रवचनं कृतम्।
 यःस्यात्प्रभवसंयुक्तः सधर्म इति निश्चयः।। -महा भारतं
२. आहिंसार्थाय भूतातां धर्मप्रवचनं कृतम्।
 यःस्यादहिंसासंयुक्तः स धर्म इति निश्चयः।।
३. धारणाद्धर्ममित्याहुःधर्मो धारयते प्रजाः।
एष धर्मो महायोगो दानं भूतदया तथा।।
ब्रह्मचर्यं तथा सत्यमनुकोशो धृतिःक्षमा।
सनातनस्य धर्मस्य मूलमेतत्सनातनम्। - आश्वं
४. धृतिःक्षमा दमोऽस्तेयं शौचमिन्द्रियतिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।। -मनुस्मृति ६.९२
धर्मं यो बाधते धर्मो न स धर्मःकुधर्म तत्।
अविरोधात् तु यो धर्मःस धर्मः सत्यविक्रम।। -महाभार......
१६८. सरस्वती
या वसेत्प्राणिजिहीसु सदा वागुपवर्तनात्।
सरस्वतीति नाम्नेयं समाखयाता मर्हर्षिभिः।।
१६९ भारदा
शरद्काले पुरा यस्मान्नवम्यां बोतिधा सुरैः।
शारदा सा समाख्याता पेठ लोके समानतः।।
१७०. महादेवी
बृहदस्य शरीरं यत् अप्रमेयं प्रमाणतः।
धातुमहेति पूजायां महादेवीततःस्मृता।। -शिवपुराणम्
१७१. महालक्ष्मी

महालनामकं दैत्यं सयति क्षपयतीति च ।
महालसा महालक्ष्मीरितिखयातिमागता।। -मैरालतन्त्रम्
पूजा-पूर्यन्ते सर्वकर्माणि जायते ज्ञानमात्मनि।
पूरणाज्ञायते यस्मात् पूजा शब्दमिहोच्यते।। -कारणागमम्
१७३. व्यासः
ब्रह्मणो ब्राह्मणानां च तथानुग्रहकाङ्क्ष्या।
विव्यास वेदान् सय्मात् स तस्माद् व्याम इति स्मृतः।
-महाभारतं आदि ६३.८८
एवं द्वैषायनो यज्ञे सत्यवत्यां पराशरात्।
न्यस्तो द्वीपे स यद् बालास्तस्माद् द्वैपायनःस्मृतः।।
-महाभारतं आदि ६३.८६
१७४. आगमः आजारकथनाद्दिव्यगतिप्राप्तिविधानतः।
महात्मतत्वकथनादागमःकथितःप्रिथे।। -कुलार्णव तत्रं
सृष्टिश्च प्रलयश्चैव र्दवतानां ययार्चनम्।
साधनञ्चैव सवेषां पुरश्चरणमेव
१७५. निगमः
मिर्गतो गिरिजावक्त्रात् गतश्चगिरिशश्रुतिं।
मतश्च वासुदेवस्य निगमःपरिकप्यते।।

एकश्लोकी रामायणम्
आदौ एमतपोवनाभिगमनं हत्वा मृगं काञ्चनम्
वैदेही हरणं जटायु मरणं सुग्रदि संभाषणम्।।
वालीनिर्दलनं समुद्रतरणं लङ्कापुरी दाहनम्।
पश्चाद्रावण-कुंभकर्णहननं एतद्धि रामायणम्।।

सप्तश्लोकी गीताः
ओमित्येकाक्षरं
यःप्रयाति
स्थाने हृषीकेश
रक्षांसि
सर्वतःपाणिपादं
सर्वतःश्रुतिमललोके
कविं पुराणमनु
सर्वस्य धातारमचित्त्य
ऊर्ध्द भूलभधःशाखमश्वत्थं
छन्दांसि यस्य पर्णानि

यथा स्फलनमुत्काल्य पशुमारं तदुच्यते।।
१०५. पाखण्डः
पालनाच्च त्रयी धर्म पशब्देनेह कथ्यते।
तं खण्डयन्ति ये मूढा पाखण्डास्तेन ते स्मृताः।।
१०६. पृच्छा
यत्रान्देषणामर्थानां वाक्यैरभ्यर्थनापरैः।
जिज्ञासुःपृच्छति परं सा पृच्छा त्वभिधयिते।।
१०७. पोष्यवर्गः
माता पिता गुरुर्भ्रात प्रजा दीनः समाश्रिताः।
अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उदाहृतः।।
१०८. प्राजापत्य व्रतंः
त्र्यहं प्रातसयहं सायं त्रयहमाद्यादयाचितम्।
त्रयहं परं च नाऽश्नीयात्प्राजापत्योयमुच्यते।।
१०९. प्रान्डिववाकः
विवादे पृच्छति प्र.नं प्रतिप क्षं तथैव च।
प्रियपूर्द प्राग्वदति ततःस्मृतः।।
११०. प्रियोक्तिः
यन्प्रसन्नेन मनसापूज्यं पूजयितुंवतः।
कर्षप्रकाशनायोग्यं साभि धीयते।।
१११. प्रेम
सर्वथा ध्वंसरहितं सत्यपि ध्वंसकारणे।
यद्भावबन्धनं योनोःस प्रेमा परिकीर्तितः।।
११२. ब्रह्मचर्यमहिमा
ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभो भवत्यपि।
सुरत्वं मानवो याति चान्ते याति पराङ्गतिम्।।
चिरायुषः सुसंस्थानादृधसंहनना नराः।
तेजस्विनो महवीर्या भवेयुर्ब्रह्मचर्यतः।।
११३. भारतवर्षः
उतरेण समुद्रस्य हिमाद्रेश्चैव दक्षिणे।
वर्षं तद्भारतं नाम भारती चत्र संततिः।।
११४. मदः
अहं माहत्मा धनवान् मत्तुलयःकोऽस्ति भूतले।
इति यज्ञायते चित्तं मदःप्राक्तःस कोविदैः।।
११५. महादेवः
पूज्यते यःसूरैः सर्वैर्भहांश्चैद प्रमाणतः।
महेति धातुःपूजा यां ततः स्मृतः।।
११६. माहामात्रः
मन्त्रे कर्मणि भूषायां वित्ते माने परिच्छदे।
मात्रा च महती येषां महामात्रास्तु ते स्मृताः।।
११७. माया
विचित्रकार्यकरणा अचिन्तितफलप्रदा।
स्वप्नेन्द्रजालवलोके तेन माया प्रकीर्तिता।।
११८. माला
ईप्सितार्थस्य सिद्ध्यर्थंक्रियन्ते यत्र सूरिभिः।

द्वैतभावो हि दुःखाय सुखायाद्वैतभावना।
भारायान्नं पृथग्भूतं भुक्तमन्नं सुखावहम्।।
९१. धर्मः
सत्याज्ञायते दयया दानेन च वर्धते।
क्षमायां तिष्ठति, क्रोधान्नश्यति।।
९२. नगरं
अनेकजातिसंबद्धं नैकशिल्पिसमाकुलम्।
सर्वदैवतसंबद्धं नगरं त्वभिधीयते।।
९३. नाट्यं
अवस्था या तु लोकस्य सुखदुःखसमुद्भवा।
तस्यास्त्वभिनयःप्राज्ञैर्नाट्यमित्यभिधीयते।।
९४.नामः
शब्देनोच्चरितेनेह येन द्रव्यं प्रतीयते।
तदक्षरविधौ युक्तं नामेत्याहुर्मनीषिणः।।
९५. नीलमणिः
यस्तु वर्णस्य भूयस्त्वात् क्षीरे शतगुणे स्थितः।
नीलतातनुयात् सर्वं स उच्यते।।
९६. नीलवृषः
लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः।
श्वेतःखुरविषाणाभ्यां स नीलो वृष उच्यते।।
९७. न्यासः
राजचोरादिकभयाद्दायादानाञ्च वञ्चनात्।
स्थाप्यतेऽन्यगृहे द्रव्यं न्यासःस परिकीर्तितः।।
९८. पङ्गुः
भिक्षार्थमटनं यस्य विण्मूत्रकरणाय च ।
योजनान्न परं याति सर्वथा पङ्गुरेव सः।।
९९. पताकाः
यद्वृत्तं हि परार्थं स्यात्प्रधानस्योपकारकम्।
प्रधानवच्च कलपते पताका साथिधीयेत।।
१००. पताकास्थानं
यत्रान्यंस्मिंश्चिन्त्यमाने तल्लिङ्गोऽन्यःप्रयुज्यते।
आगन्तुकेन भावेन पताकास्थानकं तु तत्।।
१०१. पनिव्रता
आर्तार्ते मुदिता हृष्टे प्रोषिते मलिना कृशा।
मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया।।
१०२. पत्तिः
एको रथो गजस्त्वेको नराःपञ्च पदातयः।
त्रयश्च तुरगस्तज्ज्ञैः पत्तिरित्यभिधीयते।।
१०३. पशुब्राह्मणाः
भक्ष्याभक्ष्यं समं यस्य वाच्यावाच्यंप्रियाप्रियम्।
करोत्यगम्यागमनं कृतघ्नो ब्राह्मणःपशुः।।
१०४. पशुमारं
विधृत्य हस्तौ पादौ च युगपत्पृथगेव वा।

विस्तरेणोपतिष्टानाम् अर्थानां सूत्रभाष्ययोः।
निबन्धो यः समासेन सङ्ग्रहं तं विदुर्बुधा।।

सर्ग ा प्रतिसर्ग ा वंशो मन्वन्तराणि च।
वंशानुचरितं चापि पुराणं पञ्चलक्षणम्।।

प्रवृत्तिर्वा निवृत्तिर्वा नित्यन कृतकेन वा।
पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते।।

एंश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।
वैराग्यस्याथ मौक्षस्य षण्णां भग इतीरिता।।

उत्पत्तिं च विनाशं च भूतानामागतिं गतिम्।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति।। (विष्णुपुराण-६-५-७८)

उपनीय तु यः शिष्यं वेदमध्यापयेत् द्विजः।
सकल्पं सरहस्यं च तं आचार्यं प्रचक्षते ।। (मनुस्मृति २.१४०)

आचिनोति हि शास्त्रार्थान् आचारे स्थापयत्यपि।
स्वयं ह्याचरते य ा स आचार्य इति स्मृतः।। (आपस्तम्ब गृह्य सूत्र)

गुकारोऽन्धकारो चै रुकारस्तन्निवर्त्तकः।
अन्थकारनिरोधित्वाद् गुरुरित्यभिधीयते।। (अद्वयतारक उपनिषत्)

यच्चाप्नोति यदातत्ते यच्चाति विषयानिह।
यच्चास्य संततो भावः तस्मादात्मेति कीर्त्यते।। (लिङ्गपुराण १-७०-९६)

यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह।
यच्चास्य संततो भावः तस्मादात्मेति कीर्त्यते।। (लिङ्गपुराण १-७०-९३)

श्रुतिस्स्मृतिस्सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्रहुः साक्षाद्धर्मस्य लक्षणम्।। (मनुस्मृति २-१२)

चैतन्यं यदधिष्ठानं लिङ्गदेह ा यः पुनः।
चिच्छाया लिङ्गदेहस्था तत्सङ्गो जीव उच्यते।। (पञ्चदशी ४-११)

बृहत्वात् वृंहणत्वाद्वा ब्रह्मसंज्ञा प्रवर्त्तते।
वृहत्त्वं व्यापकत्वं स्यात् वृद्धिहेतुस्तु बृंहणम्।। (वेदान्त संज्ञावलि ५५)

अग्निहोत्रम् तपस्सत्यं वेदानां चानुपालनम्।
आतिथ्यं वैश्वदेवञ्च इष्टमित्यभिधीयते।। (अत्रिसंहिता १.४.३.)

वापिकूपतडागादिदेवतायतनानि च।
अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते।। (अत्रिसंहिता १.४.४)

शारणागतसन्त्राणं भूतानां चाप्यहिंसनम्।
बहिर्वेदि च यद्दानं दत्तमित्यभिघीयते।।

यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्।।

येनकेनचिदाच्छन्नः येनकेनचिदाशितः।
यत्र क्वचन शायी स्यात् तं देवा ब्राह्मणं विदुः।। (महाभारत शा.पर्व २४५.१२)

रमन्ते योकिनो यस्मिन् नित्यानन्दे चिदात्मनि।
इति रामपदेनैतत् परंब्रह्माभिधीयते।।

नीराशीषमनारम्भं निर्नमस्कारमस्तुतिम्।
अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः।। (महाभारत शा.पर्व २६९.३४)

यो हि प्रकृतिजालस्य संसारस्य महोदधेः।
नवं नावान्तरमिति प्रणवं वै विदुर्बुधाः।। (सिवपुराण १७.४)

जन्मना ब्राह्मणो ज्ञेयः संस्काराद् द्विज उच्यते।
विद्याया याति विप्रत्वं त्रिभिःश्रोत्रिय उच्यते।। (मालति माधव १.५)

कृषिर्भूवाचकश्शबदःण ा निर्वृतिवाचकः।
तयोरेक्यं परंब्रह्म कृष्ण इत्यभिधीयते।।

आगतं पञ्चवक्त्रात् तु गतञ्च गिरिजानने।
मतञ्च वासुदेवस्य तस्मादागममुच्यते।। (शब्दकल्पद्रुम)

तनोति विपुलान् अर्थान् तत्वमन्त्रसमाश्रितान्।
त्राणञ्च कुरुते यस्मात् तन्त्रमित्यभिधीयते।। (कामिकागम)

आविद्यायाः अविद्यात्वम् इदमेव तु लक्षणम्।
यत् प्रमाणासहिष्णुत्वम् अन्यथा वस्तु सा भवेत्।। (बृहदारण्यक सम्बन्ध वार्त्तिक १८१)

एकरात्रं तु निवसन् अतिथिर् ब्राह्मणस्स्मृतः।
अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते।।

यस्य न ज्ञायते नाम न च गोत्रं न च स्थितिः।
अकस्माद् गृहमायातः सोऽतिथिः प्रोच्यते बुधैः।।

धर्मार्थकाममोक्षाणामुपदेशसमन्वितम्।
पूर्ववृत्तं कथायुक्तमितिहासम् प्रचक्षते।।

आपो नारा इति प्रोक्ताः आपो वै नरसूनवः।
अयनं तस्य ताः पूर्वं तेन नारायणस्समृतः।।

नराज्ञातानि तत्वानि नाराणीति ततो विदुः।
तानि तस्थायनं पूर्वं ते। नारायणस्स्मृतः।।

सर्वत्रासौ समस्त ा वसत्यत्रेति वै यतः।
तत ा वासुदेवाख्यो विद्वद्भिः परिपद्यते।।

उरसा शिरसा चैव मनसा वपुषा गिरा।
पद्भ्यां जानुभ्यां कराभ्यां नमस्कारोऽष्टाङ्ग उच्यते।।

अकोरो विष्णुरुद्दिष्ट अकारस्तु महेश्वरः।
मकारस्तु स्मृतो ब्रह्मा प्रणवस्तु त्रयात्मकः।।

तत्सादृश्यमभाव ा त च्त्वं तदलपता।
अप्राशस्त्यं विरोध ा नसर्थाःषट् प्रकीर्तिताः।।

कारली धूमिनी श्वेता लोहिता निल्लोहिता।
सुवर्णा मद्यरागा च जिह्वाःसप्त विभावसोः।।

अन्थत्रैव प्रणीतायाः कृत्सनाया धर्मसंहतेः।
अन्यत्र कार्यतः प्राप्तिरतिदेशः स उच्यते।।

ओंकार ााथशब्द ा द्वादेतौ ब्रह्मणःपुरा।।
कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुथौ।।

ईज्योध्ययनदानानि वैरास्य क्षत्रियस्य च।
प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा।।

विदाहकाले चत्सत्रीभयो दीयते ह्याग्निसन्निधौ।
तदध्यग्निकृतं सद्भिः स्त्रीधनं परिकीर्तितम्।।

पुरा कविनां गणनाप्रसंगे कनिष्ठिकाधिष्ठितकालिदासा
अद्यापि तत्तुल्यकवेः भावादनामिका सार्थवती बभूव।।

सखी प्रव्रजिता दासी प्रेष्या धात्रेयिका तथा।
अन्या ा शिल्पकारिण्यो विज्ञेया ह्यनुनायिका।।

भूयासामुपदिष्टानां क्रियाणामथ कर्मणाम्।
क्रमशो योऽनुनिर्देशो यथासंख्यं तदुच्यते।।

चाण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा।
मागधायोगवौ चैव सप्तैतेऽत्यावसायिनः।।

यो विलंध्याश्रमान्वर्णानात्मन्येव स्थितःपुमान्।
अतिवर्णाश्रमी योगी अवध्तःस उच्यते।।

अश्रत्वात् वरेण्यत्वात् धूतसंसारबन्धनात्।
तत्त्वमस्यर्थसिद्दत्वाद्वधूतोऽभिधीयते।।

अयोध्या मथुरा माया काशी कांचिरवंतिका।
पुरी द्वारादती चैव सप्तैता मोक्षदायिका।।

उत्तानेनैव हस्तेन प्रोक्षणं परिकीर्तितं।
न्यञ्चताभ्युक्षणं प्रोक्तं तीर ाावोक्षणं स्मृतं।।

सदृशं त्रिषु लिङ्गषु सर्दासु च दिभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।।

द्वन्द्वो द्विगुरपि चाहं मद्गहे नित्यमव्ययीभावः।
तत्पुरुष कर्मधारय येनाहं स्यां बहुर्विहिः।।

जानुभ्यां च तथा पद्भ्यां पाणिभ्यमुरसाधिया।
शिरसा वचसा दृष्ट्या प्रणामोऽष्टाङ्ग ईरितः।।

स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं।
सङ्कलपोऽध्यवसाय ा क्रियानिष्पत्तिरेव च।।

पूर्वाग्नेयी दक्षिणा च नैर्त्रध्ती पा ामा तथा।
वायवी चोत्तरैशानी दिशा अष्टाविमाःस्मताः।।

इन्द्रो दह्निः पितृपतिः नैर्त्रध्तो वरुणो मरुत्।
कुबेर ईशः पतयः पूर्वादिनां दिशां क्रमात्।।

ऐरावतः पुंडरीको वामनः कुमुदोंऽजन।
पुष्पदन्तः सर्वभौमः सुप्रतीक ा दिग्गजाः।।

स्वर्णं रूप्यं च ताम्रं च रङ्ग यशदमेव च।
शीसं लौहं रस ोति धातवोऽष्टौ प्रकीर्तिताः।।

मृगरोजो वृषो नागः कलशो व्यजनं तथा।
वैजयन्ती तथा भेरी दीप इत्यष्टमङ्गलम्।।

लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः।
हिरण्यं सर्पिरादित्य आपो राजा तथाष्टमः।।

जलं वह्निस्तथा यष्टा सूर्याचन्द्रमसै त था।
आकाशं वायुरवनी मूर्तयोऽष्टौ पिनाकिनः।।

शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाटयेरसाःस्मृतः।।

अष्टान्युपपुराणानि मुनिभिःकथितानि तु।
आद्यं सनत्कुमारोक्तं मारसिंहमतःपरम्।
तृतीयं नारदं प्रोक्तं कुमारेण तु भाषितम्।
चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम्।
दुर्वाससोक्तमा ार्यं नारदोक्तमतः परम्।
कपिलं मानवं चैव तथैवोशनसेरितं।
ब्रह्माण्डं वारुणं चाथ कालिकाह्वयर्मव च ।
माहेश्वरं तथा शाम्बं सौरं सर्वार्थसंचयम्।
पराशरोक्तं प्रवरं तथा भागवद्वयम्।
इदमष्टाद्दशं प्रोक्तं पुराणं कौर्मसंज्ञितं।
चुतुर्धा संस्थितं पुण्यं संहितानां प्रभेदतः।।

ब्राह्मं पद्मं वैष्णवञ्च शैवं भागवतं तथा।
तथान्यन्नारदीयञ्च मार्कण्डेयञ्च सप्तमम्।
आग्नेयमष्टकं प्रोक्तं भविष्यन्नदमं तथा।
दशमं ब्रह्मदैवर्तं लिङ्गमेकाढशं तथा।
वराहं द्वादशं प्रोक्तं स्कान्दं चात्र त्रयोदशम्।
चतुर्दशं वामनं च गोर्मं पञ्चदशं तथा।
मात्स्यं च गारुडं चैव ब्राह्माण्डाष्टदशं तथा।।

अङ्गानि वेदा ात्दारो मीमांसा न्यायविस्तरः।
धर्मशास्त्रां पुराणञ्च विद्या ह्येता ातुर्दरा।।
आयुर्वेदो धनुर्वेदो गान्धर्व ोति ते त्रयः।
अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैद तु।।

भक्तिभिर्थिन्नहृदयाः स्खलन्तोपि पदे पदे।
आजानन्ति यतः संज्ञामाजानेयास्ततः स्मृताः।।

अष्टमुष्टिर्भदेत् कुंचिः कुंचयोऽष्टौ तु पुष्कलम्।
पुष्कलानि च चत्वारि आढकः परिकीर्तितः।।

अग्निदो गरद ैव रास्त्रोन्मत्तो धनापहः।
क्षेत्रदारहर ैतान् षड् विद्यादाततायिनः।।

कर्तव्यमाचरन् कार्यमकर्तव्यमनाचरन्।
तिष्ठति प्रकृताचारे स वा आर्य इति स्मृतः।।

आस्मुद्रात्तु वै पूर्वादासमुद्राच्च पि ामात्।
तयोरेवान्तरं गिर्यो आर्यावर्तं दिदुबुधाः।।

वात्सल्याद्यत्र मान्येन कनिष्ठस्याभिधीयते।
इष्टावधारकं वाक्यमाशीः सा परिकीर्तिता।।

येन केनापि पालेन गद्यपद्यसमन्वितम्।
जयव्युपक्रमं मानिन्यादिप्रासविचित्रम्।।
तदुदाहरणं नाम विसक्यष्टांगसंयुतम्।

ब्रह्मो दैवस्तथा चार्षः प्रजापत्यस्तथासुरः।
गान्धर्वो राक्षस ावि पैशाच ाष्टमः स्मृतः।।

चन्द्रसूस्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये।
मन्त्रामात्रप्रकथनमुपर्दशःस उच्यते।।

गृह्योक्तकर्मणा येन समिपं नीयते गुरोः।
बालो वेदाय तद्योगात् बालस्योपनयं दिदुः।।

उपनीय तमात्मानं ब्रह्मापास्तद्वयं यतः।
निहन्त्यविद्यां तज्ञं च तस्मादुपनिषद्भवेत्।।

मिहत्यानर्थमूलं स्वाविद्यां प्रत्यक्तया परम्।
नयत्यपास्तर्सभेदमतो वोपनिष्द्भवेत्।।

प्रवृत्तिहेतून्निः शषांस्तन्मूलोच्छेदकत्वतः।
यतोदसादयेद्विद्यां तस्मादुपनिषद्भवेत्।।

प्रबन्धकलपनां स्तोकस्त्यां प्राज्ञाःकथां विदुः।
परम्पराश्रया या स्यात् सा मताख्यायिका बुधैः।।

स्दम्त्सृज्य गुणं योगादत्युज्वलगुणस्य यत।
वस्तु तद्गणतामेति भण्यते स तु तद्गुणः।।

दाग्दण्डोऽथ मनोदण्डः कायढण्डस्तथैव च ।
यस्यैते निहिता बुद्धौ त्रिढण्डीति स उच्यते।।

दमयन्ती-

भुवत्रयसुभ्रुवामसौ दमयन्ती कमनीयतामदम्।
उदियाय यतस्तनुश्रीया दमयन्तीति ततोऽभिधां दधौ।।

शुश्रूषा श्रवणं चैव ग्रहणं धारणं त्था ।
ऊहापोहार्थदिज्ञानं तत्त्वज्ञानं च धीगुणाः।।

धन्वन्तरि क्षपणकामसिंहशंकुवेतालभट्टघटकर्परकालिदासाः।
ख्यातो वराहमिहिरो नृपतेःसभायां रत्नानि वै वररुचिर्नंद

दिक्रमस्थ।।

वायुना निहितो वायुर्गगनाच्च पतत्यधः।
प्रचण्डधोरनिर्घोषो निर्घात इति कथ्यते।।

यावदेते प्रपश्यन्ति पंक्तयां तावत्युनान्ति च ।।

ततो हि पावनात्पकत्या उच्यते पांक्ति पावनाः।।

अदिकत्थनः क्षमादानतिगम्भीरो महासत्वः।
स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः।।

मायापरः प्रचण्ड ापलोऽहङ्कारदर्पभूयिष्ठः।
आत्मŽाप्वानिरतो धीरैर्धीरोद्धतःकथितः।।

अपांक्त्योपहता पंक्तिः पाव्यते यैर्द्विजोत्तमैः।
तान्निबोधत कात्स्र्येन द्विजाग्र्यान् पंक्तिपावनान्।।

पांद्तिपावनाः पंक्तौ भोजनादिगोष्ठ्यां पावनाः।
अग्रभोजिनः पवित्रावा यद्वा।

यजुषां पारगो यस्तु साम्नां य ापि पारगः।
अथर्वशिरसोऽध्येता ब्राह्मणः पंक्तिपावनः।।

अन्यवाती क्रियाद्वेषी नोपस्थायी निरुत्तरः।
आहूतप्रपलायी च हीनःपञ्चविधःस्मृतः।।

प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया।
एकात्मयं बध्यते योगात्तत्सामान्यमिति स्मृतम्।।

स्तंभः स्वेदोऽथ रोमांचः स्वरभङ्गोऽथ वेपथुः।
वेवर्ण्यमश्रु प्रलय इत्यष्टौ सात्विकाः स्मृताः।।

आसनं स्वागतं पाद्यमर्ध्यमाचमनीयकम्।
मधुपर्काचमस्नानं वसनाभरणानि च ।
गन्धपुष्णौ धूपदीपौ नैर्वद्यं वन्दनं तथा।।

अमृता मानद्दा पूषा तुष्टिः पुष्टी रतिर्धृतिः।
शशिनी चद्रिका कान्तिज्योत्समा श्रीःप्रीतिरेव च।
अङ्गदा च तथा पूर्णामृता षोडश वै कलाः।।

यस्मात्पाण्डुत्मापन्ना विरूं प्रेक्ष्य मामिह।
तस्मादेव सुतस्ते वै पाण्डुरेव ध्यविष्यति।।

दिधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते।।

जालान्त्रगते रश्मौ यत्सूक्ष्मे दृश्यते रजः।
तस्य त्रिंशत्तमो भागःपरमाणुःस उच्यते।।

गौरी पद्मा शची मेधा सादित्री विजया जया।
देवसेना स्वधा स्वाहा मातरो लोकमातरः।
शान्तिः पुष्टिर्धृतिस्तुष्टिः कुलदेवात्मदेवताः।।

धर्मार्थकाममोक्षेषु लोकतत्त्वार्थयोरपि।
षदँसु प्रज्ञा तु यस्यासौ षट्प्रज्ञः परिकीर्तितः।।

धन्वदुर्गं महीदुर्गं गिरिदुर्गं तथैव च ।
मनुष्यदुर्गं मृद्दुर्गं वनदुर्गमिति क्रमात्।।

नासां कण्ठमुरस्तालु जिह्वां दन्ता ा संस्पृशान्।
षड्ज संजायते (षड्भ्यःसंजायते) यस्मब्तस्मात् षड्ज इति स्मृतः।।

शिक्षा कलपो व्याकरणं निरुक्तं छन्दसां चितिः।
ज्योतिषामयनं चैव षङ्गो वेद उच्यते।।

गोमूत्रं गोमयं श्रीरं सर्पिदधि च रोचना।
षडङ्गमेतन् माङ्गल्यं पठितं सर्वदा गवाम्।।

अध्यापनमध्ययनं पजनं याजनं तथा।
दानं प्तिग्रह ौव षट्कर्माण्यग्रजन्मनः।।

उञ्छां प्रतिग्रहो थिक्षा वाणिज्यं पशुपालनं।
कृषिकर्म तथा चेति षट्कर्माण्यग्रजन्मनः।।

शीते सुखोष्णसर्वाङ्गी ग्रीष्मे या सुखशीतला।
तप्तकाञ्चनवर्णाभा सा स्त्री श्यामेति कथ्यते।।

उत्तराभ्यां फलगुनीभ्यां नक्ष्त्राश्यामहे दिवा।
जातो हिमदतःपृष्टे तेन मां फालगुनं दिदुः।।

व्यक्तीकृत्य कमप्यर्थ स्वरूपार्थस्य गोपनात्।
यत्र बाह्यान्तरावर्थौ कथ्यते सा प्रहेलिका।।

यदि प्रयोग एकस्मिन् प्रयोगोऽन्यःप्रयुज्यते।
तेन पात्रप्रवेश ोत् प्रयोगातिशयस्तदा।।

हेर्षादुत्सवकाले यदलङ्कारांशुकादिकम्।
आकृष्य गृह्यते पूर्णपात्रं स्यात्पूर्णकं च तत्।।

वर्धापकं यदानन्दादलङ्कारादिकम् पुनः।
आकृष्य गृह्यते पूर्णपात्रं पूर्णानकं च तत्।।

पुन्नाम्नो नरकाद्यस्मात्त्रायते पितरं सुतः।
तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा।।

पाण्डुलेखेन फलके थूमौ वा प्रथमे लिखेत्।
न्यूनाधिकं तु संशोध्य प ाान्पत्रे निवेशयत्।।

कुसुमवसन्ताद्याथिध कर्मवपुर्वेशभाषाद्यैः।
हास्यकरःकलहरतिर्विदूषकः स्यात्स्वकर्मज्ञः।।

आजानुलंबिनी माला सर्वर्तुकुसुमोज्ज्वला।
मध्ये स्थूलकढम्वाढ्या वनमालेति कीर्कीता।।

मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा।
प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते।।

मुख्यार्धबाधे तद्योगे रुदितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपितक्रिया।।

पदसंधटना रीतिरङ्गसंस्थाविशेषवत्।
उपकर्त्री रसादीनां सा पुनःस्याच्चतुर्विधा।।

वैदर्भी चाथ गाडी च पाञ्चाली लाटिका तथा।।

समेन लक्ष्मणा वस्तु वस्तुना यत्रिगृह्यते।
निजेनागं तुना वापि तन्मीलितमिति स्मृत्म्।।

कैलासशिखरे राम मनसा निर्मितं सरः।
ब्रह्मना प्रागितं यस्मात् तदभून्मानसं सरः।।

मां स थक्षयिताऽमुत्र यस्य मासमिहीद्म्यहम् ।
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः।।

मन्त्रे कर्मणि भूषायां वित्ते माने परीच्छदे।
मात्रा च महती येषां महामात्रास्तु ते स्मृताः।।

एको दशसहस्राणि योधयेद्यस्तु धन्विनाम्।
शस्त्रशास्त्रप्रवीण ा विज्ञेयःस महारथः।।

प्राणैरपि हिता वृत्तिरद्रोहोव्याजवर्जनम्।
आत्मनीव प्रियाधनमेतन्मैत्रीमहाव्रतम्।।

पुंसःस्त्रिया स्त्रिया पुंसि संभोगं प्रति या स्पृहा।
स शृङ्गार इति ख्यातः क्रीडारत्यादिकारकः।।

यस्माद्विश्वमिदं सर्वं तस्य शक्त्या महात्मनः।
तस्मादेवोच्यते विष्णुः विशधातोःप्रवेशानात्।।

वसुःसत्यः क्रतुर्दक्षः कालः कामो धृतिःकुरुः।
पुरुखा माद्रवा ा दिश्वदेदाः प्रकीर्तिताः।।

द्वाभ्यां युग्ममिति प्रोक्तं त्रिथिः Žोकैर्विशेषकम्।
कलापकं चतुभिःस्यात्तदूर्ध्वं कुलकं स्मृतम्।।

विना प्रसिद्धमाधारमाधेयस्य व्यवस्थितिः।
एकात्मा युगपदवृत्तिरेकस्यानेकगोचरा।
अन्यत्प्रकुर्वतः कार्यमशक्यान्यस्य वस्तुनः।
तथैव करणं चेति विशेषस्त्रिविधःस्मृतः।।

यत्र मुख्यफलोपाय अद्भिन्नो गर्भतोऽधिकः।
शापाद्यैः सान्तराय ा स विमर्ष इति स्मृतः।।

प्रियःकृत्वापि सङ्केतं यस्य नायाति संनिधिम्।
विप्रलब्धेति सा ज्ञेया नितान्तमवमानिता।।

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गमागमः।
महान्ति पातकान्याहुस्तत्संसर्ग ा पञ्चमम्।।

शृंगी च कालकूट ा मुस्तको वत्सनाथकः।
शङ्खकर्णीति योगीयं महापञ्चविषाभिधः।।

प्रषणं गन्धमालयानां धूपभूषणवाससाम्।
प्रलाभनं चान्नपानैर्मध्यमः संग्रहः स्मृतः।।

दधिसर्पिर्जलं क्षौद्रं सिता चैतै ा पञ्चभिः।

प्रोच्यते मधुपर्कः समांसो मधुपर्कः।।

जात्या कुलेन वृत्तेन स्वाध्यायेन श्रुतेन च ।
एभिर्युक्तो हि यस्ति ष्ठेन्नित्यं स द्विज उच्यते।।

परस्य योषितं हत्वा ब्रम्हस्वमपहृत्य च ।
अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः।।

अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः।
पञ्चगव्यं पिबेत् प्रातर्ब्रह्मकूर्चमिति स्मृतः।।

नकुर्यां कर्म बीभत्सं यध्यमानः कथंचन।
तेन द्वेवमनुष्येषु बीभत्सुरिति दिश्रतः।।